# ॥ वेङ्कटेशाष्टोत्तरशतनामस्तोत्रम् ॥

## सिद्धा ऊचुः

भगवन् वेङ्कटेशस्य नाम्नामष्टोत्तरं शतम्।
अनुब्रूहि दयासिन्धो क्षिप्रसिद्धिप्रदं नृणाम्॥

## नारद उवाच

सावधानेन मनसा शृण्वन्तु तदिदं शुभम्।
जप्तं वैखानसैः पूर्वं सर्वसौभाग्यवर्धनम्॥

## ॥ स्तोत्रम् ॥

ओङ्कारपरमार्थश्च नरनारायणात्मकः।
मोक्षलक्ष्मीप्राणकान्तो वेङ्कटाचलनायकः॥ १ ॥

करुणापूर्णहृदयः टेङ्कारजपसौख्यदः।
शास्त्रप्रमाणगम्यश्च यमाद्यष्टाङ्गगोचरः॥ २ ॥

भक्तलोकैकवरदो वरेण्यो भयनाशनः।
यजमानस्वरूपश्च हस्तन्यस्तसुदर्शनः॥ ३ ॥

रमावतारमङ्गेशो णाकारजपसुप्रियः।
यज्ञेशो गतिदाता च जगतीवल्लभो वरः॥ ४ ॥

रक्षःसन्दोहसंहर्ता वर्चस्वी रघुपुङ्गवः।
दानधर्मपरो याजी घनश्यामलविग्रहः॥ ५ ॥

हरादिसर्वदेवेड्यो रामो यदुकुलाग्रणीः।
श्रीनिवासो महात्मा च तेजस्वी तत्त्वसन्निधिः॥ ६ ॥

त्वमर्थलक्ष्यरूपश्च रूपवान् पावनो यशः।
सर्वेशो कमलाकान्तो लक्ष्मीसल्लापसम्मुखः ॥ ७ ॥

चतुर्मुखप्रतिष्ठाता राजराजवरप्रदः।
चतुर्वेदशिरोरत्नं रमणो नित्यवैभवः ॥ ८ ॥

दासवर्गपरित्राता नारदादिमुनिस्तुतः।
यादवाचलवासी च खिद्यद्भक्तार्तिभञ्जनः ॥ ९ ॥

लक्ष्मीप्रसादको विष्णुर्देवेशो रम्यविग्रहः।
माधवो लोकनाथश्च लालिताखिलसेवकः ॥ १० ॥

यक्षगन्धर्ववरदः कुमारो मातृकार्चितः।
रटद्बालकपोषी च शेषशैलकृतस्थलः ॥ ११ ॥

षाड्गुण्यपरिपूर्णश्च द्वैतदोषनिवारणः।
तिर्यग्जन्त्वर्चिताङ्घ्रिश्च नेत्रानन्दकरोत्सवः ॥ १२ ॥

द्वादशोत्तमलीलश्च दरिद्रजनरक्षकः।
शत्रुकृत्यादिभीतिघ्नो भुजङ्गशयनप्रियः ॥ १३ ॥

जाग्रद्रहस्यावासो यः शिष्टानां परिपालकः।
वरेण्यः पूर्णबोधश्च जन्मसंसारभेषजम् ॥ १४ ॥

कार्त्तिकेयवपुर्धारी यतिशेखरभावितः।
नरकादिभयध्वंसी रथोत्सवकलाधरः ॥ १५ ॥

लोकार्चामुख्यमूर्तिश्च केशवाद्यवतारवान्।
शास्त्रश्रुतानन्तलीलो यमशिक्षानिबर्हणः ॥ १६ ॥

मानसंरक्षणपर इरिणाङ्कुरधान्यदः।
नेत्रहीनाक्षिदायी च मतिहीनमतिप्रदः ॥ १७ ॥

हिरण्यदानसङ्ग्राही मोहजालनिकृन्तनः।
दधिलाजाक्षतार्च्यश्च यातुधानविनाशनः॥ १८॥

यजुर्वेदशिखागम्यो वेङ्कटो दक्षिणास्थितः।
सारपुष्करणीतीरो रात्रौदेवगणार्चितः॥ १९॥

यत्नवत्फलसन्धाता श्रीञ्जपाद्धनवृद्धिकृत्।
क्लीङ्कारजापिकाम्यार्थप्रदानसदयान्तरः ॥ २०॥

सौं सर्वसिद्धिसन्धाता नमस्कर्तुरभीष्टदः।
मोहिताखिललोकश्च नानारूपव्यवस्थितः॥ २१॥

राजीवलोचनो यज्ञवराहो गणवेङ्कटः।
तेजोराशीक्षणः स्वामी हार्दाविद्यानिवारणः॥ २२॥

इति श्रीवेङ्कटेशस्य नाम्नामष्टोत्तरं शतम्।
प्रातः प्रातः समुत्थाय यः पठेद् भक्तिमान्नरः।
सर्वेष्टार्थानवाप्नोति वेङ्कटेशप्रसादतः॥

॥ इति श्री-वेङ्कटेशाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Venkatesha_Ashtottara_Shatanama_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits